# श्रीसुरसरस्वतीसभा शृङ्गेरी

## तुरीया परीक्षा

## द्वितीयपत्रिका

दिनाङ्कः 28-08-2022 | अङ्काः - 50

पूर्वाह्ने – 1:30 तः 3:00 पर्यन्तम् | समयः – सार्धैकहोरा

सूचना – सर्वाणि उत्तराणि संस्कृतेन एव लेखनीयानि

**1 विषयमेकम् अधिकृत्य दशभिः वाक्यैः प्रबन्धमेकं लिखत ।** 5

१. पञ्चसप्ततिस्वातन्त्र्य-अमृतमहोत्सवः २. संस्कृते विज्ञानम् ३. शृङ्गेरीक्षेत्रम्

**2** (अ) काव्यं नाम किम्? काव्येषु के के अर्थाः भवन्ति? सोदाहरणं विशदयत । **4**

(आ) दश लकाराः के ? लृङ्-लकारः कस्मिन्नर्थे प्रयुज्यते इति सवाक्योदाहरणं विवृणुत । **4**

**3** (अ) अर्थान्तरन्यास-अलङ्कारं सोदाहरणं सलक्षणं विशदयत । **4**

(आ) "एतत्त्रयं जगति पुण्यकृतो लभन्ते"- एतस्य वृत्तं सलक्षणं विवृणुत । **4**

**4 उत्तरं लिखत । (त्रयाणामेव)** 3

१. 'अलं' शब्दयोगे कस्मिन् अर्थे चतुर्थी विभक्तिः भवति? उदाहरणं च लिखत ।

२. अर्धविरामचिह्नं कदा उपयुज्यते ? सोदाहरणं लिखत ।

३. 'पठ्'-धातोः "अपाठि" इति रूपं कस्मिन् प्रयोगे भवति ?

४. सर्वगुरुः कः गणः भवति (छन्दःप्रकारेण) ?

**5 द्वयोः लकारयोः पुरुषत्रये सर्वरूपाणि लिखत ।** 6

१. अकार्षीत् २. पेचे ३. भविता ४. वर्धिषीष्ट

**6 प्रयोगपरिवर्तनं कुरुत ।** 4

१. विधिवशात् प्राप्तेन सन्तुष्यताम् । २. त्वम् अक्रीडः ।

३. मृगैः त्रस्येत । ४. श्रीरामेण प्रजाः धर्मतत्पराः चक्रिरे।

7 वाक्यदोषं परिहरत । 4

१. कृष्णाय ऋते ।

२. काव्येभ्यः नाटकं रम्यम् ।

३. गोपालः गवे पयः दोग्धि ।

४. विष्णुः वैकुण्ठे अधिशेते ।

8 टिप्पणीं लिखत । (एकस्य) 2

१. सति सप्तमी २. भावे प्रयोगः

9 मातृभाषया अनुवदत । 5

१. गुरोराज्ञां नाकृथाः, न च पाठम् अपाठीः, अपि तु ग्रामान्तरम् अयासीः ।

२. प्रयत्यतां यथाशक्ति, भविष्यते फलेन ।

३. दुःशासनमभिक्रुध्यन् भीमः सङ्ग्रामभूमिम् अवतरिष्यति ।

४. यत्ते अग्ने तेजः तेनाहं तेजस्वी भूयासम् ।

५. मोक्षसाधनानां भक्तिर्गरीयसी ।

10 संस्कृतभाषया परिवर्तयत । 5

೧. ವಾಮನಜಯಾದಿತ್ಯರಿಬ್ಬರು ಕಾಶಿಕೆಯೆಂಬ ಗ್ರಂಥವನ್ನು ಬರೆದರು.

Vamanajayadithya wrote Kaasika grantha.

೨. ನೀನು ಬಂದಿದ್ದರೆ ಪುಸ್ತಕವನ್ನು ಕೊಡುತ್ತಿದ್ದೆನು.

If you had come, I would have given the book to you.

೩. ನೀವು ದೀರ್ಘಕಾಲ ಬಾಳಿರಿ.

May you all live long.

೪. ಕರು ಓಡಿಹೋಗಲು ಹುಡುಗನು ಹಿಂದೆ ಓಡಿದನು.

When the calf ran the boy ran behind it.

೫. ದೇಶಭಕ್ತರಲ್ಲಿ ಶಿವಾಜಿ ಗಣ್ಯನಾದವನು.

Among the patriots, Shivaji is counted upon as the greatest.

---